# श्रीकृष्णाष्टकम् *śrīkṛṣṇāṣṭakam*

**अनुवादकः रामुलु गजवाड**

*Rāmulu Gajavāḍa Saṁskṛtam Teacher*

वसुदेवसुतं देवं  कंसचाणूरमर्दनम्।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्॥  १

***vasudevasutaṁ devaṁ kaṁsacāṇūramardhanam|***
***devakīparamānandaṁ kṛṣṇaṁ vande jagadgurum|| 1***

अतसीपुष्पसङ्काशं हारनूपुरशोभितम्।
रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम्॥  २

***atasīpuṣpasaṅkāśaṁ hāranūpuraśobhitaṁ|***
***ratnakaṅkaṇakeyūraṁ kṛṣṇaṁ vande jagadgurum || 2***

कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननम्।
विलसत्कुण्डलधरं कृष्णं वन्दे जगद्गुरुम्॥ ३

***kuṭilālakasaṁyuktaṁ pūrṇacandranibhānanaṁ|***
***vilasatkuṇḍaladharaṁ kṛṣṇaṁ vande jagadgurum || 3***

मन्दारगन्दसंयुक्तं चारुहासं चतुर्भुजम्।
बर्हिपिञ्चावचूडाङ्गं कृष्णं वन्दे जगद्गुरुम्॥ ४

***mandāragandhasaṁyuktaṁ cāruhāsaṁ caturbhujam |***
***barhipiñcāvacūḍāṅgaṁ kṛṣṇaṁ vande jagadgurum || 4***

उत्पुल्लपद्मपत्राक्षं नीलजीमूतसन्निभम् ।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ ५

*utpullapadmapatrākṣaṁ nīlajīmūtasannibham* ।
*yādavānāṁ śiroratnaṁ kṛṣṇaṁ vande jagadgurum* ॥ **5**

रुक्मिणीकेलिसंयुक्तं पीताम्बर सुशोभितम् ।
अवाप्ततुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥ ६

*rukmiṇīkelisaṁyuktaṁ pītāmbarasuśobhitam* ।
*avāpta tulasīgandhaṁ kṛṣṇaṁ vande jagadgurum* ॥ **6**

गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कितवक्षसम् ।
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥ ७

*gopikānāṁ kucadvandvakuṅkumāṅkitavakṣasam* ।
*śrīniketaṁ maheṣvāsaṁ kṛṣṇaṁ vande jagadgurum* ॥ **7**

श्रीवत्साङ्कं महोरस्कं वनमालाविराजितम् ।
सङ्कचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ ८

*śrīvatsāṅkaṁ mahoraskaṁ vanamālāvirājitam* ।
*śaṅkacakradharaṁ devaṁ kṛṣṇaṁ vande jagadgurum* ॥ **8**

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं सद्य एव विनयिष्यति ॥ ९

**kṛṣṇāṣṭakamidaṁ puṇyaṁ prātarutthāya yaḥ paṭhet** ।
*koṭijanmakṛtaṁ pāpaṁ sadya eva vinayiṣyati*॥ *9*